# Vibhitaki

विभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलस्तथा ।
कलिद्रुमो भूतवासस्तथा कलियुगालयः ॥ (Bpn)

Vibhitaki, trilinga, aksha, karsha phala, kalidruma, bhutavasa, kaliyugala are the synonyms for vibhitaki.

विभीतकः कर्षफलो वसन्तोऽक्षः कलिद्रुमः ।
संवर्त्तको भूतवासः कल्किहार्यो बहेडकः । (Dhn)

Synonyms of vibhitaki are karsha phala, vasanta, aksha, kalidruma, samvartaka, bhutavsa, kalkiharya and bahedaka.

विभीतकः तैलफलो भूतवासः कलिद्रुमः ।
संवर्त्तकस्तु वासन्तः कल्किवृक्षो बहेडकः ॥
हार्यः कर्षफलः कल्किधर्मघ्नोऽक्षोऽनिलघ्नकः ।
बहुवीर्यश्च कासघ्नः स प्रोक्तः षोडशाह्वयः ॥ (Rjn)

Synonyms of vibhitaki are tailaphala, bhutavasa, kalidruma, samvartakam, vasanta, kalika vrksha, bahedaka, harya, karsha phala, kalika, dharmaghna, aksa, anilaghna, bahuvirya and kasaghna.

चक्षुष्यः केशजननो वीर्येणोष्णः विभीतकः ।
स्वर्यः कफहरः कासश्वासहिक्काप्रणाशनः ॥ (Mdn)

Vibhitaki is usna in veerya, caksushya, kesa janana, svarya, alleviates kapha, cures kasa, svasa and hikka.

विभितकं स्वादुपाकं कषायं कफपित्तनुत् ।
उष्णवीर्यं हिमस्पर्शं भेदनं कासनाशनम् ॥

रूक्षं नेत्रहितं केश्यं कृमिवैस्वर्यनाशनम् ।

विभीतमज्जा तृट्च्छर्दिकफवातहरी लघुः ॥
कषाया मदकृच्चाथ धातृमज्जाऽपि तद्गुणा । (Bpn)

Vibhitaki is kashaya in rasa, ruksa in guna, usna in veerya, svadu in paka, hima in sparsa, alleviates kapha and pitta, is bhedana, cures kasa, krimi, vaisvarya and is beneficial for netra, kesya, krmi.

Vibhitaka majja is kashaya in rasa, laghu in guna, madakara, alleviates kapha and vata, cures trt and chardi.

Its majja also possesses similar properties.

विभीतकं कटुः पाके लघु वैस्वर्यजित्सरः ।
कासाक्षिवक्त्ररोगघ्नः केशवृद्धिकरः परः ॥ (Dhn)

Vibhitaki is laghu in guna, katu in paka, cures vaisvarya, kasa, aksi vikara and is very beneficial for hair growth (kesa vrddhikara para).

विभीतकः कटुस्तिक्तः कषायोष्णः कफापहः ।
चक्षुष्यः पलितघ्नश्च विपाके मधुरो लघुः ॥ (Rjn)

Vibhitaka is katu, tikta, kashaya in rasa, laghu in guna, usna in veerya, madhura in vipaka, caksushya, alleviates kapha and cures palita.

विभीतकः कटुस्तिक्तः तुवरोष्णो लघुः सरः ।
पाके च मधुरो रूक्षो चक्षुष्यः केशवृद्धिकृत् ॥
हिमस्पर्शो भेदकश्च पलितस्वरभङ्गजित् ।
नासारोगं रक्तदोषं कण्ठरोगं च नेत्ररुक् ॥
जन्तूनां कासहृद्रोगनाशको मुनिभिः स्मृतः । (Nir)

Vibhitaka is katu, tikta, tuvara in rasa, laghu, sara in guna, usna in vipaka, madhura in paka, ruksha, caksushya, kesa vrddhi kara,

hima in sparsa, bhedaka, cures palita, svarabhanga, nasaroga, rakta dosha, kantha roga, netra ruk, jantu, kasa and hrdroga.

विभीतको लघुः शीतः पाके स्वादुः कफास्रजित् ।
कासहृत्क्षयकुष्ठघ्नः केशवृद्धिकरः परः ॥

परं केश्यन्तु तन्मज्जा नेत्रपुष्पहरो जनात् ।
नासारोगनेत्ररोगकृमिशुक्लहरो लघुः ॥

अक्षवृक्षभवः कल्कः श्वित्रपाण्डुगदापहः । (Sgn)

Vibhitaka is Laghu in Guna, Sita in Potency, Svadu in Paka, Kapha-Asra hara, cures Kasa-Hrt vikara-Kshaya-Kustha, is Kesa vrddhikara, para Kesya.

Its Majja is Netra Puspa hara, cures Nasa roga, Netra roga, Krmi, is Sukla hara, Laghu.

Aksa Vrksa Kalka cures Svitra, Pandu.

सर्वेषु श्वासकासेषु केवलं वा विभीतकम् । (A.Hr)

Vibhitaki is sufficient to cure all types of kasa and svasa.

रसासृङ्मांसमेदोजान् देषान् हन्ति विभीतकम् ।
स्वरभेदकफोत्कलेदपित्तरोगविनाशनम् ॥ (C.S.Su २७)

Vibhitaki cures rasa-asrk-mamsa-medaja doshas, svarabheda, kaphotkleda and pitta roga.

भेदनं लघु रूक्षोष्णं वैस्वर्यकृमिनाशनम् ।
चक्षुष्यं स्वादुपाक्याक्षं कषायं कफपित्तजित् ॥

विभीतको मदकरः कफमारुतनाशनः । (Su.S.Su ४६)

Vibhitaka is laghu, ruksa in guna, usna in veerya, svadu paka, bhedana, caksushya, and cures vaisvarya, krmi.

Its kashaya is kapha-pitta hara, madakara and cures kapha and maruta

अक्षबीजञ्च सुरया कल्कीकृत्य पिबेन्नरः ।
मूत्रदोषविशुद्ध्यर्थं तथैवाश्मरिनाशनम् ॥ (Su.S.)

Aksa Bija is made into Kalka along with Sura and this taken internally is Mutra Dosha Visuddhakara, and is Asmari nasana.

विभीतकफलं दग्धं हन्याल्लवणसंयुतम् ।
महान्तमप्यतीसारं चक्रपाणिरिवासुरान् ॥ (Vgs)

Vibhitaka Phala is burnt and this taken along with Lavana cures even Mahanta Atisara according to Cakrapani.

पिबेदुष्णाम्भसा पिष्टं साश्वगन्धं विभीतकम् ।
गुडयुक्तं प्रयत्नेन हृदयानिलनाशनम् ॥(Vgs)

Vibhitaka and Aswagandha Kalka taken along with Usna ambu and Guda is Hrdya and is Anila nasana.

विभीतकास्थिमज्जायाः दाहे कुर्यात्प्रलेपनम् । (Sodala)

Vibhitaki Asthi Majja is used as pralepana in Daha.